# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – तत्वाचार्य (M.Phil.)** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः – वेदः** | **प्रश्नपत्रम् - 2** | **समयः- 11:30 तः 02:30** |
| **दिनाङ्कः- 10/10/2019** | **संदर्भग्रन्थः –** शूक्लयजुर्वेद प्राति शाखा एवं बृहद्देवता | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 सूत्रमेकं व्याख्येयम् ।** **05**

1. सिमादितोऽष्टौ स्वराणाम ।
2. अनन्तरं संयोगः ।

**प्र-2 एकस्य सविस्तरमुत्तरं लिखत ।** **10**

1. शुक्लयजुर्वेद प्रातिशाख्यस्य प्रथमाध्यायस्य विषयान् उपस्थापयत ।
2. प्रातिशाख्यशब्दस्यव्युत्पत्यर्थं स्पष्टयन् तस्य प्रयोजनमपि लिखत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 सूत्रमेकं व्याख्येयम् ।** **05**

1. मन्ये पदपूर्वं सर्वत्र ।
2. अन्धो वीर्ये ।

**प्र-4 एकस्य सविस्तरमुत्तरं लिखत ।** **10**

1. शुक्लयजुः प्रातिशाक्यस्य पूर्णविषयान् उपस्थापयत ।
2. शुक्लयजुः प्रातिशाख्यस्य द्वितीयाध्यायगतान् स्वरविधेः विषयान् उपस्थापयत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 अधोलिखितयोरप्येकस्यैव श्लोकस्य व्याख्या विधीयताम् -।** **05**

1. असतश्च सतश्चैव योनिरेषा प्रजापतिः ।
   यदक्षरं च वाच्यं च यथेतद्ब्रह्म शाश्वतम् ।।
2. निरूप्यते हविर्यस्यै सूक्तं च भजते च या ।
   सैव तत्र प्रधानं स्यान्न निपातेन या स्तुता ।।

**प्र-6 अधोनिर्दिष्टयोरप्येकस्यै व प्रश्नस्योत्तरं लिखत -।** **10**

1. बृहद्देवताग्रन्थस्य महत्त्वं वेदव्याख्यादृष्ट्या प्रतिपादयत ।
2. बृहद्देवतानुसारं संज्ञाक्रिययोः स्वरूपमुपस्थापयत ।

**प्र-7 अधस्ताल्लिखितयो: श्लोकयो: कस्यचिदेकस्यैव व्याख्या विधीयताम् -।** **05**

1. मित्रश्च श्रूयते देवो वरुणेन सहासकृत्।
   रुद्रेण सोमः पूष्णा च पुनः पूषा च वायुना ।।
2. प्राणभूतस्तु भूतेषु यद्वेनत्येष तिष्ठति।
   तेनैव वेनमाहर्षि वेनो नामेह भार्गवः ।।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 अधोलिखितयोरप्येकस्यैव प्रश्नस्योत्तरं लिखित -।** **10**

1. बृहदेवतायाः द्वितीयाध्याये वर्णितानां देवानां विषये यथाज्ञानं लिखत।
2. बृहदेवतानुसारं विष्णोः स्वरूपम् (द्वितीयाध्यायमाश्रित्य) उपस्थापयत।

**प्र-9 दशानां लघूत्तराणि लिखत।** **10**

1. शांखायन-शाखायाः सम्बन्धः केन वेदेनास्ति
2. कौथुम शाखा केन वेदेन सम्बद्धोऽस्ति
3. ऋषि पैलः केन वेदेन सम्बद्ध आसीत्
4. वैशम्पायनः कस्मिन् वेदे निष्णात आसीत्
5. कतमो वेदः सहस्रवर्त्मा
6. नीचैरनुदात्तः - इति सूत्रं कस्य स्वरस्य विषये कथयति
7. उभयवान् स्वरितः - इत्यस्य कोऽर्थः
8. तेने त्यागमः - इति सूत्रस्य कोऽर्थः
9. बृहद्देवतायाः रचयिता कोऽस्ति
10. शुक्लयजुः प्रातिशारव्यस्य रचयिता कोऽस्ति
11. गिर्वण: पदमेतत् उदात्तं अनुदातं वा भवति?
12. बृद्देवतायां कियन्तोऽध्यायाः सन्ति
13. बृहद्देवतायाः प्रथमेऽध्याये कियन्तः श्लोकाः सन्ति
14. भावप्रधानमाख्यातं - बृहद्देवतायामप्यस्ति न वा
15. समस्तव्याहृतेः (बृहदेवतानुसारम्)) किं दैवतम्

***************